स्वामी॥ (आलस्यम् । इति मधुसूदनसरस्वतिः ॥)

गुडाकेशः, पुं, (गुडाका निद्रा माया इत्यर्थस्तस्या ईशः ।) शिवः । (गुडा निद्रा आलस्यं इन्द्रियाणि वा तस्या ईशः शास्ता जितनिद्रो जितेन्द्रियो वा ।) अर्ज्जुनः । इति जटाधरः ॥ (यथा, गीतायाम् । १ । २४ ।
"एवमुक्तो हृषीकेशो गुडाकेशेन भारत ! ॥")

गुडाशयः, पुं, (आशेतेऽस्मिन्निति । आशयो वासस्थानम् । ततो गुडस्येव मधुररसस्य आशयः ।) आखोटवृक्षः । इति राजनिर्घण्टः ॥

गुड़िका, स्त्री, (गुडा वर्त्तुलाकृतिः । स्वार्थे कन् टापि अत इत्वम् ।) गुटिका । इहदुवटिका । यथा, वैद्यकपरिभाषा ॥
"वटिका गुटिका चेति संज्ञावान्तरभेदतः ।"
("चूर्णावलेहगुड़िका कल्कानामनुपानकम् ।
वातपित्तकफोद्रेके त्रिद्वेकपलमाहरेत् ॥
इति शार्ङ्गधरे मध्यखण्डे षष्ठेऽध्याये ॥)

गुडुची, स्त्री, (गुड़ची+निपातनादुत्वागमः ।) गुडूची । इति द्विरूपकोषः ॥

गुडूची, स्त्री, लताविशेषः । गुलञ्च इति भाषा ॥ तत्पर्य्यायः । वत्सादनी २ छिन्नरुहा ३ तन्त्रिका ४ अमृता ५ जीवन्तिका ६ सोमवल्ली ७ विशल्या ८ मधुपर्णी ९ । इत्यमरः ॥ गुड़ची १० । इति भरतः ॥ कुण्डली ११ चक्रलक्षणा १२ । इति रत्नमाला ॥ अमृतवल्ली १३ ज्वरारिः १४ श्यामा १५ वरा १६ सुरकृता १७ मधुपर्णिका १८ छिन्नोद्भवा १९ अमृतलता २० रसायनी २१ छिन्ना २२ सोमलतिका २३ भिषक्प्रिया २४ कुण्डलिनी २५ वयःस्था २६ नागकुमारिका २७ छद्मिका २८ चन्द्रहासा २९ । इति राजनिर्घण्टः ॥ अमृतवल्लरी ३० सुधा ३१ जीवन्ती ३२ सोमा ३३ चक्रलक्षणिका ३४ वयस्था ३५ मण्डली ३६ देवनिर्म्मिता ३७ । अस्या गुणाः । कटुत्वम् । स्वादुपाकित्वम् । रसायनत्वम् । संग्राहित्वम् । कषायत्वम् । उष्णत्वम् । लघुत्वम् । बल्यत्वम् । अग्निदीपनत्वम् । दोषत्रयामतृड्दाहमेहकासपाण्डुकामलाकुष्ठवातास्रज्वरकृमिवमिनाशित्वञ्च । इति भावप्रकाशः ॥ गुरुत्वम् । वीर्य्योष्णत्वम् । भ्रमनाशित्वञ्च । इति राजनिर्घण्टः ॥ रक्तपित्तनाशित्वम् । इति राजवल्लभः ॥ अस्याः पत्रस्य गुणाः । आग्नेयत्वम् । सर्व्वज्वरहरत्वम् । लघुत्वम् । कषायत्वम् । कटुत्वम् । स्वादुपाकित्वम् । रसायनत्वम् । बलकारित्वम् । उष्णत्वम् । संग्राहित्वम् । त्रिदोषतृष्णादाहप्रमेहवातासृक्कामलाकुष्ठपाण्डुतानाशित्वञ्च । इति भावप्रकाशः ॥ घृतयुक्ताया वातनाशित्वम् । गुड़युक्तायाः पित्तनाशित्वम् । मधुयुक्तायाः कफनाशित्वम् । एरण्डतैलयुक्ताया उग्रवातास्रनाशित्वम् । शुण्ठीयुक्ताया आमवातनाशित्वम् । इति राजवल्लभः ॥ * ॥

अस्या उत्पत्तिर्यथा,—
"अथ लङ्केश्वरो नाम्ना रावणो राक्षसाधिपः ।
रामपत्नीं बलात् सीतां जहार मदनातुरः ॥
ततस्तं बलवान् रामो रिपुं जायापहारिणम् ।
बलं वानरसैन्येन जघान रणमूर्द्धनि ॥
हते तस्मिन् सुराराती रावणे बलगर्व्विते ।
देवराजः सहस्राक्षः परितुष्टोऽपि राघवे ॥
तत्र ये वानराः केचिद्राक्षसैर्निहता रणे ।
तानिन्द्रो जीवयामास संसिच्यामृतवृष्टिभिः ॥
ततो येषु च देशेषु कपिगात्रात् परिच्युताः ।
पीयूषबिन्दवः पेतुस्तेभ्यो जाता गुडूचिका ॥"
इति भावप्रकाशः ॥

(गुडूचीघृतम् । यथा,—
"गुडूचीक्वाथकल्काभ्यां सपयस्कं घृतं शृतम् ।
हन्ति वातं तथारक्तकुष्ठं जयति दुस्तरम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे वातरक्ताधिकारे ॥)

गुड़ेरः, पुं, (गुड़ति रक्षतीति गुड़ रक्षायाम्+ "पतिकठिकुठिगड़ि गुड़िदंशिभ्य एरक् ।" उणां । १ । ५८ । इति एरक् । रक्षकः । इति व्युत्पत्तिलब्धोऽर्थः ।) ग्रासः । इत्युणादिकोषः ॥ गुड़कः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

गुड़ेरकः, पुं, (गुड़ेर+स्वार्थे कन् ।) ग्रासः । इति हेमचन्द्रः । ३ । ८९ ॥

गुड़ोद्भवा, स्त्री, (गुड़ादुद्भवो यस्याः । यद्वा, उद्भवत्यस्मादिति उद्भवः । गुड़ उद्भवो उत्पत्त्याश्रयो यस्याः ।) शर्करा । इति राजनिर्घण्टः ॥

गुण, त् क मन्त्रणे । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) ह्रस्वी । मूर्द्धन्योपधः । गुणयति । इति दुर्गादासः ॥

गुणः, पुं, (गुण्यते मन्त्र्यते मन्त्रणादिभिर्निश्चीयते राजभिरितिशेषः । गुण मन्त्रणे+घञ् ।) षट्प्रकारराजनीतिविशेषः । तद्यथा । सन्धिः १ विग्रहः २ यानम् ३ आसनम् ४ द्वैधम् ५ आश्रयः ६ ॥ (यथा, मनुः । ७ । १६० ।
"सन्धिञ्च विग्रहञ्चैव यानमासनमेव च ।
द्वैधीभावं संश्रयञ्च षड्गुणांश्चिन्तयेत् सदा ॥"
एते षड्गुणास्तु नीतिविदा राज्ञा कदा केनोपायेन च प्रयोक्तव्यास्तद्विवरणादिकन्तु तत्रैव । ७ । १६१ । श्लोकमारभ्य द्रष्टव्यम् ॥) धनुराकर्षणरज्जुः । छिला इति भाषा । (यथा, रघुवंशे । ९ । ५४ ।
"अथ नभस्य इव त्रिदशायुधं
कनकपिङ्गतडिद्गुणसंयुतम् ।
धनुरधिज्यमनाधिरुपाददे
नरवरो रवरोषितकेशरी ॥")
तत्पर्य्यायः । मौर्व्वी २ ज्या ३ शिञ्जिनी ४ शिञ्जा ५ ज्यावा ६ पतञ्चिका ७ । इति शब्दरत्नावली ॥ जीवा ८ । इति जटाधरः ॥ रज्जुः । (यथाह कश्चित् ।
"गुणवन्तोऽपि सीदन्ति न गुणग्राहको यदि ।
सगुणोऽपि पूर्णकुम्भो यथा कूपे निमज्जति ॥"
सूत्रम् । यथा, आर्य्यासप्तशत्याम् । ३६९ ।
"काञ्चीगुण इव पतितः स्थितैकरत्नः फणी
स्फुरति ॥")
सत्त्वरजस्तमांसि । (यथा, भागवते । १ । २ । २३ ।
"सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते ।
स्थित्यादये हरिविरिञ्चिहरेति संज्ञाः
श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः ॥")
शुक्लकृष्णरक्तपीतादिः । द्रव्याश्रितः । स तु शौर्य्यादिः रसगन्धादिश्च । इत्यमरः । ३ । ३ । ४६ ॥ तस्य लक्षणं यथा,—
"सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते ।
आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः ॥"
इति मुग्धबोधम् ॥

(अस्यार्थमाह दुर्गादासः ।
"यः सत्त्वे द्रव्ये निविशते तदेवाश्रयतीत्यर्थः । अपैति तस्मात् सत्त्वादपगच्छतीत्यर्थः ॥ यथा श्यामता पूर्व्वमाम्रादिफलमुपगच्छति पश्चात पक्वदशायां ततोऽपैति । पृथक् जातिषु दृश्यते भिन्नेषु पदार्थेषु दृश्यते । यथा आम्रादिफले या श्यामता दृष्टा सा कदलीफलादिषु च दृश्यते स गुणः स्यादित्यर्थः । ननु तर्हि उत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनानि पञ्चैव कर्म्माणीति उक्तकर्म्मस्वपि गुणत्वापत्तिः यदा द्रव्यं सक्रियं भवति तदा कर्म्म सत्त्वे निविशते यदा द्रव्यं निष्क्रियं भवति तदा कर्म्म सत्त्वादपैति पृथग्जातिषु च दृश्यते यथा मनुष्येषु गमनादिक्रिया दृश्यते तथा पश्वादिषु च दृश्यते अतः कर्म्मणो गुणत्वमपाकर्त्तुमाह आधेयश्चाक्रियाजश्चेति । आधेय उत्पाद्यः यथा पक्वमृण्मयपात्रेषु रक्ततागुणः सहि वह्निसंयोगादिना निष्पाद्यते । अक्रियाज इति । क्रियाया जायते । इति क्रियाजः । न क्रियाजोऽक्रियाजः नित्य इत्यर्थः । आकाशादिषु महत्त्वादिर्गुणः । ततश्च गुणस्य उत्पाद्यत्वमनुत्पाद्यत्वञ्च इति प्रकारद्वयदर्शनतया कर्म्मणो गुणत्वं न स्यादिति ज्ञापितम् कर्म्मत्वं सर्व्वमेव उत्पाद्यमिति । एवञ्चेत्तर्हि द्रव्यमपि गुणोऽस्तु तत्रापि ह्येते धर्म्मा वर्त्तन्ते । यथा तदपि द्रव्यमारम्भके अवयवद्रव्ये निविशते ततोऽपैति च यथा शरीरमवयवि तद्धि मस्तकादिष्ववयवेषु समवेतं भवतीति तद्विनाशात् ततोऽपैति । पृथग्जातिषु पश्वादिषु च दृश्यते एवं द्रव्यस्य उत्पाद्यत्वमनुत्पाद्यत्वञ्चास्ति अवयवि द्रव्यस्य उत्पाद्यत्वात् आकाशादेस्तु अनुत्पाद्यत्वादिति । अत आह असत्त्वप्रकृतिरिति । सत्त्वं द्रव्यं प्रकृतिःस्वभावः । सत्त्वं प्रकृतिर्यस्य स सत्त्वप्रकृतिः । न सत्त्वप्रकृतिरसत्त्वप्रकृतिः ॥") विशेषाधानहेतुः सिद्धो वस्तुधर्म्मः । शुक्लादयो हि गवादिकं स्वजातीयेभ्यः कृष्णगवादिभ्यो व्यावर्त्तयन्तीति साहित्यदर्पणम् ॥

अपि च ।
द्रव्यत्वव्यापकतावच्छेदकसत्त्वान्यजातिमत्त्वं तदर्थः तद्यथा । रूपम् १ रसः २ गन्धः ३ स्पर्शः ४